This Question Paper consists of **41** questions and **8** printed pages.

अस्मिन् प्रश्नपत्रे **41** प्रश्नाः एवम् **8** मुद्रित पृष्ठाः सन्ति ।

Roll No.
अनुक्रमाङ्कः

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

**9076**

# SANSKRIT
# संस्कृतम्
# (209)

**Code No.** **70/S/O/S**
**कूट सं.**

**SET/सेट** **A**

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ..............................................................................

Signature of Invigilators 1. ............................................
(निरीक्षकयोः हस्ताक्षरम्)

2. ............................................

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

**सामान्य अनुदेशाः –**

1. **सर्वेषां** प्रश्नानामुत्तराणि दत्तोत्तरपुस्तके एव लिखन्तु ।
2. प्रश्नपत्रिकां पठितुं **15** निमेशाः दत्ताः । प्रश्नपत्रिका **02.15** मध्यह्ने समये दीयते । **02.15** समयतः **02.30** समयपर्यन्तं प्रश्नपत्रिकामेव छात्राः पठेयुः, एतस्मिन् समये उत्तरपत्रिकायां न किमपि उत्तरं लिखेयुः ।
3. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः ।
4. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति । प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्ष्यणीयम् ।
5. वस्तुनिष्ठप्रश्नेषु (क), (ख), (ग) वा (घ) विकल्पेषु किमपि एकम् उत्तरं चित्वा पृथक्रूपेण प्रदत्ते उत्तर-पुस्तिकामध्ये लिखेत् ।
6. वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि ।
7. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।
8. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट (कोड) संख्या **70/S/O/S, Set/सेट** **A** अवश्यमेव लेखनीया ।



**UNNATI EDUCATION**
**9899-436-384: 9654-279-279**

## SANSKRIT

## संस्कृतम्

## (209)

**Time : 3 Hrs]** **[Maximum Marks : 100**

**समय : होरात्रयम् ]** **[ पूर्णाङ्काः – 100**

---

**निर्देशाः** (i) अस्मिन् प्रश्नपत्रे **(A)** भागे **20 + 7 = 27, (B)** भागे **5, (C)** भागे **5, (D)** भागे **4** इति आहत्य **41** प्रश्नाः सन्ति ।

(ii) **सर्वे** प्रश्नाः अनिवार्याः सन्ति । तत्र वैकल्पिक भागे एकः एव समाधेयः ।

(iii) प्रत्येकं प्रश्नस्य दक्षिणपार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति अङ्काः दीयन्ते ।

(iv) **[A]** भागे प्रश्नसंख्या **1** तः **20** पर्यन्तं बहुवैकल्पिकप्रकारस्य प्रश्नाः (MCQs) । येषु प्रत्येकम् एकः अङ्कः भवति । एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकं उपयुक्तं विकल्पं चित्वा लिखन्तु । एतेषु केषुचित् प्रश्नेषु आन्तरिकः विकल्पः प्रदत्तः अस्ति । एतादृशेषु प्रश्नेषु दत्तविकल्पेषु एकस्य एव प्रयासः करणीयः ।

(v) प्रश्नसंख्या **21** तः **27** पर्यन्तं वस्तुनिष्ठप्रश्नाः सन्ति । ते यथानिर्देशं समाधेयाः ।

(vi) **[B]** भागे प्रश्नसंख्या **28** तः **32** पर्यन्तम् अतिलघूत्तरीयाः प्रश्नाः । प्रत्येकम् अङ्कद्वयात्मकाः सन्ति । ते यथानिर्देशं समाधेयाः ।

(vii) **[C]** भागे प्रश्नसंख्या **33** तः **37** पर्यन्तम् अनतिदीर्घोत्तरीयाः प्रश्नाः । प्रत्येकम् चतुरङ्कात्मकाः सन्ति । ते यथानिर्देशं **50** तः **80** शब्दानां परिमध्ये समाधेयाः ।

(viii) **[D]** भागे प्रश्नसंख्या **38** तः **41** पर्यन्तम् दीर्घोत्तरीयाः प्रश्नाः । प्रत्येकम् पञ्च अङ्कात्मकाः सन्ति । ते यथानिर्देशं **80** तः **100** शब्दानां परिमध्ये समाधेयाः ।

(ix) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एव लेखनीयानि ।

(x) उत्तरपत्रिकायां प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या ।

(xi) उत्तरपत्रिकायाम् आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।

(xii) सर्वेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।

(xiii) निरीक्ष्यतां यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य आरम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यक् न वा ।

(xiv) अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यं लेख्यः ।

---



UNNATI EDUCATION
9899-436-384: 9654-279-279

## भाग – A

**अधोलिखितानां विंशतिप्रश्नानां युक्तं विकल्पं चिनुत ।** **1 × 20 = 20**

1. वानरस्य नाम किम् ? **1**

(क) करालमुखः (ख) रक्तमुखः

(ग) जम्बुवृक्षः (घ) रक्तवदनः

2. प्रथमं शरीरात् का निर्गता ? **1**

(क) चक्षुः (ख) श्रोत्रं

(ग) मनः (घ) वाक्

3. कः मत्स्यः विनश्यति ? **1**

(क) यद्भविष्यः (ख) अनागतविधाता

(ग) प्रत्युत्पन्नमतिः (घ) दुर्गो

4. गोदावरी नदी कीदृशी ? **1**

(क) तापसी (ख) प्रसन्नसलिला

(ग) धर्माचारिणी (घ) चित्रकानना

5. 'अवसितमण्डना' इति कस्य विशेषणम् ? **1**

(क) प्रियंवदा (ख) गौतमी

(ग) कण्वः (घ) शकुन्तला

6. वायोः शीघ्रतरं किम् ? **1**

(क) वैद्यः (ख) मनः

(ग) चिन्ता (घ) मित्रं

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

7. 'शशिन्' शब्दस्य षष्ठीविभक्ति – एकवचने किं रूपम् ? **1**

(क) शशिनः (ख) शशिना

(ग) शशिने (घ) शशी

8. 'विचरामः' अस्य क्रियापदस्य उचितम् अर्थं चिनुत । **1**

(क) आचरामः (ख) गच्छामः

(ग) विचारमग्नः (घ) पर्यटामः

9. एकःद्रुमः कतिपुत्रसमो भवति ? **1**

(क) एकः (ख) दश

(ग) शतम् (घ) पञ्च

10. सर्वेषु बलेषु श्रेष्ठं बलं किम् ? **1**

(क) शक्तिः (ख) सत्यं

(ग) धनं (घ) शासनम्



**UNNATI EDUCATION**
**9899-436-384: 9654-279-279**

11. 'खादताम्' इतिक्रियापदस्य लट्लकारे सदृशं क्रियापदं चिनुत । 1

(क) खादतम् (ख) खादत

(ग) खादसि (घ) खादतः

12. दौवारिकः कस्य आज्ञां पालयति ? 1

(क) संन्यासिनः (ख) शिववीरस्य

(ग) गौरसिंहस्य (घ) लेखकस्य

13. सुर + इन्द्रः अस्य सन्धियुक्तपदं किम् अस्ति ? 1

(क) सुरिन्द्रः (ख) सुरेन्द्रः

(ग) सुरैन्द्रः (घ) सुरौन्द्रः

14. देवसुरयोः मध्ये युद्धं कुत्र अभवत् ? 1

(क) समुद्रतीरान्ते (ख) प्रासादे

(ग) स्वर्गलोके (घ) वने

15. भोजनं कैः सह कुर्यात् ? 1

(क) शत्रुभिः (ख) बन्धुभिः

(ग) स्त्रीभिः (घ) पक्षिभिः

16. 'वर्षान्ते' इत्यत्र कः समासः ? 1

(क) सप्तमी – तत्पुरुषः (ख) षष्ठी – तत्पुरुषः

(ग) पंचमी – तत्पुरुषः (घ) तृतीया – तत्पुरुषः

17. 'सरोवरः' अस्य पर्यायपदं किम् ? 1

(क) मत्स्यः (ख) पवनः

(ग) दुर्गः (घ) सरः

18. सीताशब्दस्य सम्बोधने रूपं किम् ? 1

(क) सीतायाः (ख) सीतायाम्

(ग) सीते (घ) सीतौ

19. _______ अलम् । उचितपदेन रिक्तस्थानपूर्तिः कुरूत । 1

(क) कोलाहलेन (ख) कोलाहलम्

(ग) कोलाहले (घ) कोलाहलात्

20. कः + अपि अत्र सन्धौ किं रूपम् ? 1

(क) कापि (ख) कोपि

(ग) कोऽपि (घ) काऽपि



UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

**UNNATI EDUCATION**
**9899-436-384: 9654-279-279**

21. उचितविकल्पान् मेलयत । **1 × 4 = 4**

| | 'क' स्तम्भः | | 'ख' स्तम्भः |
|---|---|---|---|
| (i) | आकर्ण्य | (क) | गुहासु |
| (ii) | चन्दनवृक्षः | (ख) | मन्त्रितम् |
| (iii) | कथितम् | (ग) | श्रुत्वा |
| (iv) | कन्दरेषु | (घ) | सन्तापहरणम् |

22. अधोलिखितेषु वाक्येषु सत्यं असत्यं वा इति लिखत । **1 × 4 = 4**

(i) जले लोहितं समुत्सृजेत् ।

(ii) द्वन्द्वसहिष्णुत्वं तपः ।

(iii) प्राणानां संकटे तु साधुजनः स्ववृत्तिं त्यजति ।

(iv) पृथ्वी अस्माकं माता वयं तस्याः पुत्राः ।

23. उदाहरणानुसारम् अधोलिखितानां शब्दानां विभक्तिवचनसहितं रूपं लिखत । **1 × 4 = 4**

| | **शब्दाः** | **विभक्तिः** | **वचनम्** | **रूपम्** |
|---|---|---|---|---|
| उदा. | फल | द्वितीया वि. | द्विवचनम् | फले |
| (i) | छात्र | तृतीया वि. | बहुवचनम् | ___ |
| (ii) | जम्बुफल | द्वितीया वि. | बहुवचनम् | ___ |
| (iii) | शकुन्तला | सम्बोधन | एकवचनम् | ___ |
| (iv) | पृथिवी | षष्ठी वि. | एकवचनम् | ___ |

24. उचितधातुरूपेण वाक्यपूर्तिः कुरूत । (किमपि चतुष्टयम्) **1 × 4 = 4**

(i) प्रजापतिः _________ । (वद् धातुः – लङ्लकारे)

(ii) अनेके ज्योतिर्विज्ञाः अद्यापि विदुषां मार्गदर्शनं _________ । (कृ धातुः – लट्लकारे)

(iii) त्वं जपमालां _________ । (त्यज् धातुः – लोट्लकारे)

(iv) दौवारिकः तमाकृष्य _________ । (नी धातुः – लट्लकारे)

(v) अहं अपि मनोयोगेन _________ । (पठ् धातुः – लृट्लकारे)



UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR
**UNNATI EDUCATION**
**9899-436-384: 9654-279-279**

25. अधोलिखितानां सन्धिं सन्धिविच्छेदं वा कृत्वा नामोल्लेखमपि कुरूत । (किमपि चतुष्टयम्) **1 × 4 = 4**

(i) सर्व + इन्द्रियाणि = ________ ________

(ii) इति + ________ = इत्यपि ________

(iii) ________ + ________ = साक्षरः ________

(iv) सत्याग्रह + आश्रमः = ________ ________

(v) प्रभा + ________ = प्रभेव ________

26. अधोरेखांकितं पदम् अनुसृत्य प्रश्ननिर्माणं कुरूत । **1 × 5 = 5**

(i) शुनः षट् गुणाः ।

(ii) वैदेहि ! अयोध्यां प्रणामं कुरू ।

(iii) भवता सत्यम् अभिहितम् ?

(iv) गावः क्षीरं यच्छन्ति ।

(v) दौवारिकः प्रभुवर्यस्य आदेशं पालयति ।

27. अधोलिखितानां प्रकृति-प्रत्ययविभागं योगं वा अपेक्षानुसारं कुरूत । **1 × 5 = 5**

(i) दृश् + क्त्वा = ________

(ii) वि + लोक् + ________ = विलोक्य

(iii) ________ + ________ = वदन्तः

(iv) खाद् + तुमुन् = ________

(v) ________ + ________ = ज्ञात्वा

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

## भाग – B

अधोलिखितानां पञ्चानां प्रश्नानाम् उत्तराणि निर्देशानुसारं लिखत । **2 × 5 = 10**

28. दयां कः याचते ? संन्यासी दौवारिकाय किं दातुं कथयति ?

29. भूमेः गुरुतरा का अस्ति ? किं मरिष्यतः मित्रं च ?

30. 'वत्स ! सावधानो भव । भवान् एव आक्रम्यते ।' इति वाक्यं कः कं प्रति कथयति ?

31. देवेन्द्रः शक्रः करुणाम् आपन्नः सन् मातलिं किम् उवाच ?

**अथवा**

साधुजनः प्राणात्ययेऽपि कां न त्यजति ? (पूर्णवाक्येन उत्तरत)

32. सत्पुरुषाः कीदृशाः इव ? (पूर्णवाक्येन उत्तरत)



**UNNATI EDUCATION**
**9899-436-384: 9654-279-279**

## भाग – C

**अधोलिखितानां पञ्चानां प्रश्नानाम् अनतिदीर्घोत्तरं लिखत ।** **4 × 5 = 20**

33. स्वपाठ्यपुस्तकात् स्मृतं किञ्चित् श्लोकद्वयं लिखत ।

**अथवा**

'निर्ममो नित्यसत्त्वस्थो.........' इति

'ध्यायन् क्लेशान् ...........' इति वा एकं श्लोकं प्रपूर्य स्वभाषया भावार्थं लिखत ।

34. चन्द्रकेतोः चरित्रं अष्टवाक्येषु लिखत ।

35. 'त्याज्यं न धैर्यम्' इति कथायाः सारं अष्टवाक्येषु लिखत ।

36. रामस्य किष्किन्धातः अयोध्यां प्रति यात्रावर्णनं कुरूत ।

37. 'प्राणस्य श्रेष्ठत्वम्' पाठाधारितं इन्द्रियाणां कार्यं पञ्चवाक्येषु लिखत ।

## भाग – D

38. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत । **5**

कश्चन बालकः आसीत् । तस्य पिता नितरां निर्धनः आसीत् । बालकः अध्ययनं कर्त्तुम् इच्छति स्म । किन्तु यस्मिन् गृहे 'उदरपूर्तिः' इति समस्यायाः एव उत्तरं न स्यात् तत्र तस्य अध्ययनाय व्यवस्था कथं भवेत् ? अतः बालकः विद्यालयं गच्छतः स्वसमवयस्कान् बालकान् दृष्ट्वा निश्श्वासिति स्म । सः बालकः स्नेहपरः, मृदुभाषी च आसीत् । पित्रा सह कार्यं कुर्वन् सः बहूभिः बालैः सह मैत्रीं सम्पादितवान् । ते बालकाः तम् अक्षराणि अपाठ्यन् । अक्षराभ्यासं कृत्वा अन्यैः उपयुक्तपूर्वाणि पुस्तकानि पठन् शब्दज्ञानादिकं प्राप्तवान् सः । 'पुत्रः विद्यालयं प्रति प्रेषणीयः' इति पितुः अति तीव्र–इच्छा आसीत् । किन्तु निर्धनतया जन्या असहायता तं बाधते स्म । अधिकधनसम्पादनस्य आशया सः कदाचित् पुत्रेण सह कोलकतानगरं प्रति प्रस्थितवान् ।

**प्रश्नाः –**

(i) बालकस्य पिता कीदृशः आसीत् ?

(ii) बालकः कथं शब्दज्ञानादिकं प्राप्तवान् ?

(iii) पिता पुत्रेण सह कुत्र प्रस्थितवान् ?

(iv) बालकस्य गृहे कस्याः समाधानं न आसीत् ?

(v) पितुः का तीव्र–इच्छा आसीत् ?



UNNATI EDUCATION
9899-436-384: 9654-279-279

39. अधोलिखितेषु एकं विषयम् अधिकृत्य मञ्जूषायाः सहायतया दशवाक्येषु एकम् अनुच्छेदं लिखत। **5**

**वृक्षाणां महत्त्वम्**

| **मञ्जूषा** |
|---|
| आश्रमस्थलम्, औषधम्, काष्ठम् सहायकाः, फलानि, मेघवर्षणे, विहगानाम्, पुष्पाणि, प्रकृतेः, यच्छन्ति, रक्षकाः, प्राणवायुं, शोभां, पर्यावरणस्य, छायाम् |

**अथवा**

**प्रातः भ्रमणम्**

| **मञ्जूषा** |
|---|
| प्रातःकालः, मन्दः पवनः, शीतलः, मनोहराणि दृश्याणि, सर्वत्र, सर्वे, वृद्धाः, पुष्पाणि, बालकाः, उद्यानस्य, प्रकृतिवर्णनम् |

40. स्वविद्यालयस्य वर्णनं कुर्वन् मित्रं राकेशं प्रति पत्रं लिखत। **5**

**अथवा**

अस्वस्थतायाः हेतोः दिनद्वयस्य अवकाशार्थं कक्षा-अध्यापिकां प्रति पत्रं लिखत।

41. अधोलिखितं चित्रं दृष्ट्वा मञ्जूषायाः सहायतया दश वाक्यानि लिखत। **5**



| **मञ्जूषा** |
|---|
| भवने प्रीतिभोजः, जनाः, पंक्तिद्वये, अनेके, भोजनं कुर्वन्ति, एकः परिवेशयति, सर्वेषाम् अग्रे, स्थाल्यः, मग्नाः, जनद्वयम्, भोजनं, आनयतः, पृष्ठे, एकः वृक्षः, उपविष्टाः |

**अथवा**

मञ्जूषातः शब्दान् चित्वा पञ्च वाक्यानि लिखत।

| **मञ्जूषा** |
|---|
| उद्याने, पुष्पाणि, जनाः, बालकाः वृक्षाः |



**UNNATI EDUCATION**
**9899-436-384: 9654-279-279**